Library IIAS, Shimla
S 294.167 N 59 P
00098450

लघु–ग्रन्थमाला

[ ४५ ]

आचार्यनीलकण्ठविरचितं

# पौराणिकज्यौतिषम्


सम्पादकः

डॉ० इन्दुनाथशर्मा

प्राध्यापकः,

ज्यौतिषविभागे

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी



S
294.167
N 59 P

294.167
N.59 P



सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

LAGHU-GRANTHAMĀLĀ

[ Vol. 45 ]

# PAURĀṆIKAJYAUTIṢAM

OF

**ĀCĀRYA NĪLAKAṆṬHA**

EDITED BY

**DR. INDUNĀTHA ŚARMĀ**
Lecturer,
Deptt. in Jyotiṣa
Sampurnanand Sanskrit University
Varanasi

VARANASI
1989

Research Publication Supervisor :—
**Director, Research Institute,**
Sampurnanand Sanskrit University
Varanasi.

●

Published by—
**Dr. Harish Chandra Mani Tripathi**
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

●

Available at—
**Sales Department,**
Sampurnanand Sanskrit University
Varanasi-221 002.

●

First Edition—500 Copies
Price Rs. 5·00

●

Printed by—
Dr. Ram Manohar Mishra
O. S. D.
Sampurnanand Sanskrit University Press
Varanasi.

लघु-ग्रन्थमाला

[ ४५ ]

आचार्यनीलकण्ठविरचितं

# पौराणिकज्यौतिषम्

सम्पादकः

डॉ० इन्दुनाथशर्मा

प्राध्यापकः,

ज्यौतिषविभागे

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी

वाराणस्याम्

२०४६ तमे वैक्रमाब्दे    १९११ तमे शकाब्दे    १९८९ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

●

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२.

●

प्राप्तिस्थानम्—
विक्रयविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१००२,

●

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम्—५=०० रूप्यकाणि

●

मुद्रकः—
डॉ० राममनोहरमिश्रः
विशेषाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयमुद्रणालयस्य
वाराणसी।

S
294.167
N 59 P

98450
19-9-2005

Library IIAS, Shimla
S 294.167 N 59 P
00098450

# आमुखम्

## ग्रन्थकारपरिचयः

पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्द्धरवंशावतंशगोविन्दसूरिसूनोः नीलकण्ठस्य नाम सप्तदशशततमवैक्रमाव्दस्यार्धे समजनीति जानन्त्येवैतिह्यविदः। श्रीमन्तः नीलकण्ठमहाभागाः लोकोत्तरचमत्कारप्रतिभामया आसन् इति तत्र-तत्र तेषां रचनानामवलोकनेन ज्ञायते। एवं हि सप्तदशशतकमध्ये नीलकण्ठचतुर्द्धरस्याविर्भावः काश्यामेव बभूव। पितुर्नाम गोविन्दसूरिः मातुश्च फुल्लाम्बिका आसीदिति। स्वग्रन्थानां पुष्पिकासु नीलकण्ठः 'पदवाक्यप्रमाणमर्यादा धुरन्धरचतुर्द्धरवंशावतंसः' इति उक्त्या आत्मानं प्रकाशयति। आसीदेतेषां गौतमगोत्रः। एतेषां त्रयः भ्रातरः, शिवः, श्रीकृष्णः, त्र्यम्बकश्चासन्। पुत्रश्च गोविन्दसूरिः पौत्रश्च शिवदीक्षितनामाऽऽसीदितीतिहासपृष्ठावलोकनेन ज्ञातं भवति।

नीलकण्ठस्य पूर्वपुरुषा गोविन्दकूपरनगरस्य कूपरग्रामे पूर्वं न्यवसन्। गच्छता कालेन कूपरग्रामात् कमलाकरो नाम पण्डितः काशीमाजगाम। स च नीलकण्ठस्य जीवनकालादेव आचारप्रदीपनाम्नः ग्रन्थस्य रचनाञ्चकार। ग्रन्थे च तस्मिन् महावैयाकरणस्य भट्टोजिदीक्षितस्यापि नामाङ्कनं जातम्, येन नीलकण्ठस्य कुटुम्बेन तस्य प्रगाढ़सम्बन्धोऽपि सिद्धयति। एतेनेदं सिद्धयति यन्नीलकण्ठचतुर्द्धरमहोदयस्य पूर्वजाः महाराष्ट्रीया आसन्। गोविन्दसूरिः गोदावरीनद्यास्तटे कश्यपेश्वरशुक्रेश्वरदेवालययोः सन्निधावनिवसत्। इदञ्च तथ्यं शिवदीक्षितस्य धर्मतत्त्वप्राकाशनाम्नि ग्रन्थे स्पष्टतया प्रतिपादितम्। कूपरग्रामादिमे चतुर्द्धरवंशीयाः क्रमशः कतिपयस्थानानि परित्यज्यान्ते 'पैठन' इत्याख्ये स्थाने स्थायिरूपेणान्यवसन्। पैठननामकमिदं स्थानम् 'अहमदनगर' मण्डले सम्प्रति राजते। निवाङ्गानामग्रामं महाराष्ट्रस्य राजा साहूनामा नीलकण्ठस्य प्रपौत्राय गङ्गारामदीक्षिताय १७४६ खिष्टाब्दे उपहारस्वरूपेण प्रायच्छत्। अतो नीलकण्ठस्य महाराष्ट्रियत्वं सिद्धयति।

## नीलकण्ठस्य गुरवः

नानाशास्त्रवैशारद्यं नीलकण्ठस्य दृश्यते श्रूयते च। तथा च तत्तच्छास्त्राण्येतेन विविधगुरुभ्योऽधीतानीति क्रमेणैकैकं निरूप्यते। ज्यौतिषे—गोपालः, वेदे शिवः, वेदान्ते—लक्ष्मणाचार्यः, क्रतुविधा—नारायणतीर्थः तर्कशास्त्रे—धीरेश-

मिश्रः, **व्याकरणे महाभाष्ये च**—गोपालगङ्गाधरः, **श्रौत्रे**-चिन्तामणिश्चेति।

एतेनेदं सिद्ध्यति यद् विभिन्नगुरुभ्यो नानाशास्त्रं नीलकण्ठेनाधिगतम्। समेषां गुरूणां स्मरणं तेन तत्तद्विषयकग्रन्थरचनासु कृतम्। तन्त्रेऽपि तस्य रचना शिवताण्डव तन्त्रटीका इति ज्ञायते।

## नीलकण्ठस्य कृतयः--

नामानुरूपं वैदुष्यमधिकृत्य नीलकण्ठः विभिन्नविषयेषु ग्रन्थान् प्रणीतवान्। तत्र क्रमेणैकैकं निरूप्यते।

## वेदान्ते--

वेदान्तशतकः मन्त्रशारीरकम्, आनन्दमयाधिकरणविचारः, शिवाद्वैत-निर्णयश्च।

## पुराणेतिहासे--

महाभारतस्य टीका ( भावदीपः, भावदीपिका नाम्नी वा ) अस्यैवान्तर्गता गीताया अपि टीका वर्तते ) हरिवंशस्य टीका, मन्त्रभागवतस्य टीका ( मन्त्ररहस्य-प्रकाशिका नाम्नी ) मन्त्ररामायणस्य टीका, मन्त्रकाशीखण्डस्य टीका (अनयोर्लिपि-कालः १७०३ खिष्टाब्दकालः ) गणेशगीताया टीका (रचनाकालः १६९४ ईशवीयः) सौरपौराणिकमतसमर्थनम्।

## तन्त्रे--

शिवताण्डवतन्त्रस्य टीका, ( रचनाकालः १६८० ईशवीयः ) गणेशोपासना-विषयकग्रन्थः, ज्ञानाङ्कुशः, रुद्रमीमांसा, रुद्रसारसंग्रहस्य टीका, विधुराधानविचारः अपत्निकाधानविचारो वा।

## पौराणिकज्यौतिषमिति ग्रन्थस्य रचनाकालः--

सौरपौराणिकमतसमर्थनग्रन्थस्य या पाण्डुलिपिः सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयीयसरस्वतीभवनग्रन्थागारे प्राप्ता, तस्या लिपिः देवनागरी अस्ति। अस्यां पाण्डुलिपौ १-१६ पत्राणि सन्ति। तस्याकारश्च ९.६ × ३.७ इत्यस्ति। ग्रन्थकारो नीलकण्ठचतुर्द्धरः ग्रन्थसंख्या च ३७१२२ अस्ति। अस्य ग्रन्थस्य नाम पौराणिक-ज्यौतिषमप्यस्ति यस्य ग्रन्थसंख्या २५०८८, पत्राणि -२२, ग्रन्थकर्ता च नीलकण्ठ-चतुर्द्धर इत्यस्ति। अस्य लिपिकालः १८४४ वैक्रमाब्दः, अनयोः सौरपौराणिकमत-समर्थनं पौराणिकज्यौतिषमिति ग्रन्थयोर्विषयस्यैक्यं वर्तते। नामभेदे सत्यपि विषय-

श्लोकभेद उभयोरवलोकनेन न क्वापि समुपलभ्यते। अतो अत्रामुखे मया बहुशः पौराणिकज्यौतिषमिति स्थाने सौरपौराणिकमतसमर्थनमित्येव नाम गृहीतम्। तत्र च ग्रन्थावसाने "सौरपौराणिकमतसमर्थनम्"। श्रीरामाय नमः। संवत् १७३६, मार्गशीर्षशुक्लद्वितीयायां काश्यां श्रीविश्वनाथनगर्या श्रीदशपुत्रोपनामक कृष्ण-पण्डितानां पुत्रेण रामचन्द्रेण लिखितम्। तेन श्रीरामः प्रीयताम्। शुभमस्तु। श्रीरस्तु। विश्वनाथदीक्षितस्य पुस्तकमिदं चातुर्द्धरोपाख्यमल्लारिदीक्षिततनुजस्य। श्रीकृष्णः शरणं मम। श्रीरामकृष्णाय नमः। श्रीरामाय नमः। श्रीरामः शरणम्" इति लिखितम्।

एतेनेदं प्रमाणितं यन्नीलकण्ठचतुर्द्धरमहोदयाः सप्तदशख्रीष्टाब्दौ प्रादुर्बभूवुः। ग्रन्थरचना च काश्यामेव समजनि।

## ग्रन्थसमीक्षणम्

पदवाक्यप्रमाणमर्यादाधुरन्धरनीलकण्ठचतुर्द्धरनिर्मितं पौराणिकज्यौतिषमिति ग्रन्थः पौराणिकज्यौतिषवैज्ञानिकज्योतिषयोः समन्वयात्मक इव दृश्यते। ग्रन्थकारेणात्र भुवो गोलाकारत्वं प्रत्याख्यातम्। (यच्च वैज्ञानिकगोल-विदामाधारभूतेन पृथिव्या गोलत्वेनैव ध्रुवानुरोधाद्, ग्रहनक्षत्राणां दैनिकपरिभ्रमणेन दिनरात्र्योर्वृद्धिह्रासावुत्पद्येते इति)। नीलकण्ठचतुर्द्धरमहोदयेन परमाधिकं दिन-मानम् अष्टादशमुहूर्तमेवाङ्गीकृतम्; किन्तु कथमेतत्सम्पद्यते ? कस्मिन्नक्षांशे एतद्दिनमानं सम्भवितुमर्हतीत्यादिचर्चा क्वापि न कृता। अनेन विषुवद्वृत्ते सर्वत्रैव दिनरात्र्योः समत्वमङ्गीकृतम्। साक्षप्रदेशे तद्दिनसाम्यं न भवतीति अङ्गीकृत्वापि दिनरात्र्योः समत्वमङ्गीकरणं ग्रन्थकर्तुरसामर्थ्यमेव व्यनक्ति। यतो हि तस्या पृथिव्याः कन्दुकाकारत्वाङ्गीकारेणैव गोलविधया उपपादयितुं शक्यते। मुकुरोदर-सन्निभायाः क्षितेरुपरि दिनमानस्य ह्रासवृद्धी उपपत्त्या नैव सनाथीकर्तुं युज्येते। एवञ्च भूपृष्ठवासिनां सूर्यस्य दर्शनं सदा भवेत्। यथाह भास्कराचार्यः--

यदि समा मुकुरोदरसन्निभा, भगवती धरणी तरणिः क्षिते।
उपरि दूरगतोऽपि परिभ्रमन्, किमु नरैरमरैरिव नेक्ष्यते[1] ॥इति॥

अयं भावः। यथा ध्रुवसम्मुखे भुवोपरि दूरे विद्यमानाः देवाः सदा सूर्यं पश्यन्ति, तथैव भुवो दर्पणाकारसमत्वे भूपृष्ठस्था नरा अपि सूर्यं द्रष्टुं शक्नुवन्ति। एवञ्च दिन रात्र्योरुत्पत्तौ मेरुः कारणमेव विद्यते तदा मेरुणाऽन्तर्हिते सूर्ये सुमेरुः कथं न दृग्गोचरी भवति। इदमेव समालोचयन्नाह भास्कराचार्यः--

---

१. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे, श्लोक सं० ११।

यदि निशाजनकः कनकाचलः किमु तदन्तरगः स न दृश्यते ।
उदगयं ननु मेरुरथांशुमान् कथमुदेति च दक्षिणभागके[1] ।।इति।।

अत्र नीलकण्ठः पौराणिकमतं समर्थयन् कथयति-ध्रुवेरश्मिवद्धारवेरश्वाः ध्रुवेणाकृष्टा विषुवदुत्तरमागच्छन्ति रश्मीनां शैथिल्ये च ते विषुवतो दक्षिणस्यां दिशि गच्छन्ति । एवं क्रमशो विषुवतो दक्षिणोत्तरकाष्ठयोरशीतिशतानि मण्डलानि परिभ्रमन् रविर्दृश्यते । तेन षष्ठ्युत्तरत्रिशतानि ( ३६० ) मण्डलान्येकस्मिन् वर्षे रविणाऽऽक्रम्यन्ते । समाधानमिदमपि ग्रन्थकर्त्तुर्गोलानभिज्ञत्वमेव द्योतयति । यतो हि दिनरात्र्यो ह्रासवृद्धी तत्कल्पनया न कदाऽपि समाधातुं शक्येते । चतुर्द्धरमहोदयेनात्र विषये ग्रन्थे विहितं समाधानमपि हास्यास्पदमेव । यतो हि कुलालचक्रवद् गोलायां पृथिव्यां सर्वत्रैव यौगपद्येनैव सूर्यदर्शनं सम्भवितुमर्हति ।

चतुर्द्धरमहोदयेनात्र ग्रन्थे पुराणसम्मता विज्ञानविरुद्धास्त्रयो विषयाः समाहिताः । तत्र प्रथमस्तूपरि निर्दिष्ट एव । द्वितीयोऽयं विषयः ग्रन्थसंस्थायाः सूर्यादुपरि-चन्द्रस्य स्थितिरिति । तेन द्विविधाऽनुपपत्तिः समुपपद्यते । तत्र प्रथमा सूर्यग्रहणे चन्द्रबिम्बेन रविबिम्बस्य पिहितत्वादेव सूर्यग्रहणसम्भावना भवति । सूर्यादधस्थश्चन्द्रः कुहुस्थं रविं पिधातुं प्रभवति तत्र ग्रहणद्वये राहुकेतोरेव हेतुत्वं प्रतिपादितम्, न खलु चन्द्रस्य, तदर्थं मत्स्यपुराणस्य वचनान्यपि प्रस्तुतीकृतानि—

सर्वेषां तु ग्रहाणां वै सूर्योऽधस्तात् प्रसर्पति ।
विस्तीर्णं मण्डलं कृत्वा तस्योर्ध्वं चरते शशिः ।।
नक्षत्रमण्डलं चापि सोमादूर्ध्वं प्रसर्पति ।
नक्षत्रेभ्यो बुधस्तूर्ध्वं बुधादूर्ध्वं तु भार्गवः ।।
वक्रस्तु भार्गवादूर्ध्वं वक्रादूर्ध्वं बृहस्पतिः ।
तस्मात् शनैश्चरश्चोर्ध्वं देवाचार्यो परिस्थितः ।।
शनैश्चरात्त[2]तश्चोर्ध्वं शेषं[3] सप्तर्षिमण्डलम् ।
सप्तर्षिभ्यो ध्रुवश्चोर्ध्वमिति[4] नक्षत्रमडलम्[5] ।। इति ।।

अथ राहुकेत्वोः सूर्यग्रहणस्य हेतुत्वं प्रस्तुतीकुर्वन्नाह ग्रन्थकारः—

---

१. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लोक संख्या १२

२. 'तथा' इति पुराणे पाठः । ३. 'ज्ञेयं' इति पुराणे पाठः । ४. 'समस्तं त्रिदिवं ध्रुवे' इति पुराणे पाठः । ५. मत्स्यपुराणे १२७ अध्याये ७२ तः ७५ श्लोकाः ।

सुषुम्नः सूर्यांशुः प्रथयति विधुं वेदवचनात्
तमस्तद्द्वारमेत्य ग्रसति तमिहान्येन वपुषा
कुहुस्थेन्दुत्क्रान्तं रविविषयमाविध्य च विधुम्
तुदश्चन्द्रं गच्छन् ग्रहणयुगमेवं वितनुते ।।

इत्थं व्याख्यातमिदं ग्रन्थकर्त्रा–"सुषुम्नः सूर्यरश्मिश्चन्द्रमागन्धर्वः" इति श्रुतौ सुषुम्नाख्यसूर्यरश्मिना परीक्ष्यमाणत्वात् चन्द्रमसि सुषुम्नशब्दो न तु स एव चन्द्रमा "सुषुम्नः[1] सूर्यरश्मिर्यः क्षीणं शशिनमेधते[2]" इति ।

"सूर्यरश्मिः सुषुम्नायस्तर्पितस्तेन चन्द्रमा[3] इत्युपक्रम्य"
"क्षीणं पीतं सुरैः सोममाप्याययति [4]दीप्तिमान्" ।। इति ।।

ततश्च तमो राहुः सूर्यमण्डलस्याधस्स्थः सन् तद् द्वारा सुषुम्नद्वारा चन्द्रमेत्याऽऽगत्य दृष्ट इत्यर्थः । इह पौर्णमास्यां पर्वणि न तु कालान्तरेऽन्येन वपुषा केतुरूपेण चन्द्रं ग्रसते ।

अयं भावः एकस्य चक्षुषो यथा अधिष्ठानभूतं गोलकद्वयम् एवं स्वऽर्भानोः राहुरूपं केतुरूपं चाधिष्ठानद्वयम् । तच्च नित्यं राशिमण्डलस्थं समसूत्रे चरति अतोऽन्यतरेण सुषुम्नद्वारा दृष्टमिन्दुमितरो ग्रसते । अतोऽपर्वणि न चन्द्रग्रहणं भवति । तथा कुहुषु अमावास्यासु सूर्यस्योपरि पृष्ठत आगच्छता इन्दुनाऽऽक्रान्तो यावान् खेर्विषयः सूर्यमण्डलप्रदेशस्तं सूर्यभागमाविध्य तमसाऽऽच्छाद्य सूर्यमण्डलस्योपरिस्थं चन्द्रं स्वर्भानुरासुरः सूर्यं तमसाऽऽविध्यत् । "यत्वा सूर्यस्वर्भानुस्तमसाऽऽविध्यदासुरः,[5] इत्यादि । तदुक्तं विष्णुपुराणे –

आदित्यान्निर्गतो राहुः सोमं गच्छति पर्वसु ।
आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु[6] इति ।।

आदित्यात् आदित्यं प्राप्य सुषुम्नद्वारा निर्गतः सन् सोमं पौर्णमास्यां गच्छति एवं सोमात् सोममादित्यस्थं सत्वमादित्यमेव गच्छतीति श्लोकार्थः । ग्रहणयुगमेव वितनुते इति स्पष्टार्थः, सूर्यादुपरि चन्द्रोऽस्तीत्युक्तम् ।

---

१. सुषुम्ना सूर्यरश्मिर्या क्षीणं शशिनमेधते' 'इति पुराणे पाठः । २. मत्स्यपुराणे १२७ अध्याये ३० श्लोकार्धः । ३. विष्णुपुराणे २/११/२२ ४. विष्णुपु० २/१२/४ ५. ऋग्वेद । ६. विष्णु पु० २/१२/२२ ।

अथ ग्रन्थस्य षोडशतमेश्लोकेऽपि ग्रन्थकारो भुवः कन्दुकाकारत्वं चन्द्रस्य सूर्याऽधस्थत्वञ्च प्रत्याचष्टे । तद्यथा—

यदि ब्रूषे सूर्यग्रहणमपिधानात् शशभृता
तदा तत्स्यात् सन्ध्यामनुविविधराश्योरपि तयोः
वदन्नूर्णा वृत्तानिह खगपथानन्तरवती
शशाङ्केन्द्वोर्वेधं कथमनुभवेत्तद्दिशि वदेः ॥

अत्रापि नीलकण्ठेनोक्तं यत् ख मध्ये चेद् चन्द्रसूर्ययोर्ग्रहणं भवति तदा सूर्यादधस्स्थेन चन्द्रेण सन्ध्यायां सूर्यस्य पिधानं न सम्भवति, यतो हि ग्रन्थकारदृष्ट्या कक्षाभेदात् घटनेयमसम्भवैव, किन्तु तल्लम्बनद्वारेण पिधानकाल एव भेदः सम्पद्यते । न खलु चन्द्रेण सूर्यबिम्बस्य पिधानमेवासद्भावं गच्छति । इदमपि ग्रन्थकारस्य गोलविषयानभिज्ञत्वं प्रकटयति । चन्द्रशृङ्गोन्नतावपि ग्रन्थकारेणोक्तम् । चन्द्रकलानां ह्रासवृद्धयोः कारणीभूतं चन्द्रस्य सूर्यस्योपरि स्थितत्वमेव, किन्तु सूर्येणैव चन्द्रस्य प्रकाशितत्वे चन्द्रस्य अधोभाग एव प्रकाशितो भविष्यति । यः खलु भूस्थानमस्माकं दृग्गोचरी भविष्यति, तेन चन्द्रस्य सर्वस्यान्तिथौ पूर्णः प्रकाशितो भाग एव भूस्थानामस्माकं दृग्गोचरी भवितुमर्हति । यथा सूर्यस्योपरिस्थानां भौमगुरुशनीनां पूर्णबिम्बः प्रकाशितो दृग्गोचरी भवति । अत्र गोलविषयमिममुपेक्ष्य नीलकण्ठः कथयति—

अथेत्यवाचीने खलु शशभृदस्तोदयपदे
ततोऽधोऽधो देशान्नयनकिरणा तत् समगुणान्
समाक्रान्तुं शक्ता इति विपुलकक्षो दिविचरः
स्ववृत्तार्धाधस्थोऽप्यनुसरतु चक्षुर्विषयताम् ॥

तुलादौ भूमध्यरेखया समसूत्रदेशे यत्र चन्द्रो दृष्टस्तदनुविध्योपरि प्रदेशस्थानामस्माकं दृष्टिर्मध्यसूत्रस्याधस्स्थनीयमपि विषयमाप्नोति, तदा महाकक्षास्थो रविस्तुलादिविवरे मध्यरेखातोऽधस्स्थोऽप्यस्माकं दृष्टिगोचरो भवेत् । ततश्च तस्मिन्नवसरे समत्वं रात्रिदिवसयोर्न स्यात् । न चास्य दोषस्य निवारणे गोलवादिनः काचिदुक्तिरस्ति । तस्मात् पौराणमेव मतं वस्तुतत्त्वम् । गोलवादस्तु गणितलाघवार्थं दृष्टिसृष्टिवदेव विवक्षामात्रमिति विद्वांस एव विदाङ्कुर्वन्तु ।

अत्र ग्रन्थकारेणोक्तं यत् तुलास्थे रवौ यदि अधस्थो रविर्दृग्गोचरो भवेत्, तदा तस्मिन् समये दिनरात्र्योः समत्वं न स्यात्। इदमपि गोलानभिज्ञत्वमेव तस्य द्योतयति। यतो हि सायं तुलासम्पातस्थ एव रवौ एकस्मिन् दिवसे दिन-रात्र्योः साम्यं भवति। विषुवद्वृत्तादधस्थे रवौ दिनरात्र्योः साम्यं न भवति। सूर्यादधस्थस्य चन्द्रस्य कलासु ह्रासवृद्धयोर्न कोऽपि प्रभावो विषुवद्वृत्ताद् दक्षिणस्थे रवौ भवतीति स्पष्टं गोलविदाम्। ग्रन्थकृत उक्तिस्तु तत्र भ्रमोत्पादिकैवेति सुधीभिरूह्यमिति।

## प्रस्तुतप्रकाशनविषये किञ्चिद्

पौराणिकज्यौतिषमिति ग्रन्थे अन्वर्थतया तत्तद् पुराणवचांस्युद्धृतानि। प्रायशः विष्णुपुराण-मत्स्यपुराण-ब्रह्मवैवर्तपुराणानामेवोद्धरणानि प्रतिज्ञावाक्यत्वेनात्र तत्र-तत्र गृहीतानि, परं ब्रह्मवैवर्तपुराणस्यैकमपि वचनं मयाऽत्र न प्राप्तम्। ब्रह्मवैवर्तपुराणमित्यस्योदाहरणे तु प्रायशः विष्णुपुराणोद्धृतान्येव वचांस्यधि-गतानि। यथा पञ्चमश्लोकस्य विवरणे "ब्रह्मवैवर्ते" इत्यस्योदाहरणे विष्णु-पुराणान्तर्गतद्वितीयांशस्याष्टमाध्यायस्य ७४, ७५, ७६ श्लोकोद्धृतवचना-न्यधिगतानि। एवमेव त्रयोदशश्लोकव्याख्यायां "ब्रह्मवैवर्ते च दर्शनादित्यस्या-प्युद्धरणे विष्णुपुराणप्रयोजकान्येव प्रमाणानि न्यस्तानि। एवमेवास्यैव श्लोकस्य व्याख्यानप्रसङ्गे 'उक्तं मात्स्ये ब्रह्मवैवर्ते च' इत्यस्योदाहरणे विष्णुपुराणोक्तमेव कथनमधिगतम्। ग्रन्थकर्त्रा ज्यौतिषग्रन्थस्य सिद्धान्तशिरोमणेः एकमेव प्रमाणं पञ्चदशश्लोके 'नगनगाक्षीत्यादिश्लोकमुखेनोपन्यस्तम्।' एवं हि पुराण-प्रमाणोपन्यासे विष्णुपुराणमत्स्यपुराणयोरेव प्रमाणानि समाधृतानि दृश्यन्तेऽत्र ग्रन्थे। स्वाभीष्टमतदार्ढ्यें क्वचन ऋग्वेदमहाभारतादिगतप्रमाणान्यपि परिकल्पितानि तत्र-तत्र। एवं ब्रह्मवैवर्तपुराणवचनविपर्यये ग्रन्थकर्तुः प्रौढिकल्पनापेक्षया ग्रन्थकर्तुः स्मृतौ तत्तद्पुराणविषयस्यैक्यात् प्रमाणवचन-विपर्यय इति कल्पितुं शक्यते। यतो हि पूर्वाचार्य्या गभीराध्ययनपरायणाः सन्तः श्रुति-स्मृति-शास्त्रपुराणवचांसि सिद्धाः भवन्ति स्म। अतः प्रमाणवचनो-पन्यासे सङ्केतस्य विभ्रमः सम्भवति।

अस्य ग्रन्थस्य प्रमाणान्वेषणे किमप्यायासविशेषः मया समाकलितः। अतः सङ्केतरूपेण पाठभेदान्ते 'क' 'ख' इति विवरणमुपन्यस्तं मया। पुराणवचनेन अत्र ग्रन्थोद्धृत वचनभेदे तस्यापि संकेतः 'इति पुराणे पाठः' इत्यनेन समाकलितम्। यथा च ग्रन्थविषये साफल्यं स्यात्तदर्थमहं यथाशक्यं प्रयतितवान्। यदि कोविदां किमपि मोदाय ममायं प्रयासः स्यात्तदात्मानं कृतार्थम्मन्ये। यदि अज्ञानाद्, भ्रमेण, मुद्रणेन काश्चन त्रुटयः स्युस्तदा ताः क्षन्तव्याः सूचनीयश्चायं जनो येनागामिनि प्रकाशने ताः सम्मार्जिताः स्युरिति:

# कृतज्ञताज्ञापनम्

अस्य लघुग्रन्थस्य प्रकाशनाय स्वनामधन्यानां विभागीयाध्यक्षचराणां तत्र भवतां स्व० डॉ० मुरारिलालशर्म्मणामाधमर्ण्यं शिरसा वहामि यैः स्वकाले एतदर्थ-महमादिष्टः। तेषां प्रेरणया वर्तमानेऽस्मिन् कार्ये सम्प्रति वर्तमानाः आचार्याः डॉ० कृष्णचन्द्रद्विवेद महोदयाः समये-समये प्रबोध्य माम् भृशमुपाकुर्वन् येनेदं प्रकाशनं जायते। अत एतदर्थं तेभ्यो अनेकैः सारस्वतसपर्यावचोभिः कृतज्ञतां ज्ञापयामि। परमपूज्याः विद्यैकानुरागिणः पण्डितप्रवराः स्वर्गीयाः श्री श्रीचन्द्रपाण्डेयमहोदयाः पदे पदे साहाय्यं विधायास्माकं कार्यमिदं साधितवन्तः। अतः कैश्शब्दैस्तेषामुपकारं स्मरामि इति न जाने। केवलं सारस्वतवचोभिः तेषामुपकारं स्मरामि। मत्सुहृदा डॉ० राजनाथत्रिपाठी महोदयेनास्मिन् कार्ये मम सर्वथा साहाय्यं सम्पादितमिति साधुवादैस्तं सभाजयामि। एते हि पाण्डुलिपिसम्पादनपुरस्सरं, सर्वं हि प्रकाशन-संपादनकार्यजातं पूरितमिति। विश्वविद्यालयीयानुसंधानसंस्थाननिदेशकैः डॉ० भागीरथप्रसादत्रिपाठिवर्यैः ग्रन्थस्यास्य प्रकाशनं स्वीकृत्य महदुपकृतमिति तान् प्रति कृतज्ञतामावेदयामि सादरम्। प्रकाशनाधिकारि डॉ हरिश्चन्द्रमणित्रिपाठि-महोदयैश्च ग्रन्थमुद्रणे सहयोगदानेन भृशमुपकृतम्। अतस्तेभ्यो कृतज्ञताज्ञापनं सर्वथास्माकं कर्तव्यम्। अत्र प्रकाशने मम बुद्धिभ्रमेण मुद्रणदोषेण च यास्त्रुटय-स्युस्ताः क्षन्तव्या मनीषिभिः। अन्ते गिरिजाजानीं स्मरन् तयोः पादपद्मेषु रचनेयं मोदाय निवेद्य विरमामि।

महाशिवरात्रिः<br>संवत् २०३९<br>११ फरवरी, सन् १९८३

विदुषां वशंवदः<br>डॉ० इन्दुनाथशर्मा<br>प्राध्यापकः, ज्यौतिषविभागे<br>सम्पूर्णानन्द संस्कृत विश्वविद्यालये<br>वाराणस्याम्।

॥ श्रीगणेशाय नमः ॥

# पौराणिकज्यौतिषम्

॥ श्रीगुरुदक्षिणामूर्त्तये नमः ॥

पौराणिकज्यौतिषमतयोर्भुवनकोशे विरोधसमाधानं वक्तुं प्रतिजानीते प्रणम्येति

प्रणम्य श्रीकृष्ण[1]मुनिमखिलपौराणिकं गुरुं
प्रवक्ष्ये रोदस्योस्तदभिमतमाकारममलम् ।
यथा शृङ्गौन्नत्यप्रमुखमुपपद्येत[2] सकलं
यथा वेदव्यासव्यवहृतिविरोधश्च न भवेत्॥१॥

रोदस्यो द्युभूम्योः[3], आकारमिति प्रमाणस्याप्युपलक्षणम् । ग्रहयुतिग्रहणोदयास्तच्छायादिकं प्रमुखपदार्थः । वेदव्यासः[4] पुराणं व्यवहृतिर्गणकशास्त्रम्[5] ॥१॥

अत्र शङ्कते—

क्व पञ्चाशत्कोट्योऽवनिविपुलतां योजनमितेः
क्व दैवज्ञाः बाहुः क्षितिमयुतगव्यूतिपरिधिम् ।
क्व रोदस्योरन्त[6]र्धरणिरद[7]भागे भवलयं
क्व तारा किञ्जल्कं कु[8]गुदिकमिदं नीपकुसुमम् ॥२॥

अयुतगव्यूतयः पञ्चसहस्रयोजनानि परिधिरस्यास्तां धरणिरदभागे पञ्चाशत्कोटियोजनविस्तीर्णाया भुवो द्वात्रिंशतमेशे सार्द्धकोटिषट्[9]लक्षाणि पञ्चविंशति[10]सहस्राणि च । तत्र नीपेति कदम्बकुसुमं[11] यथा अन्तर्ग्रन्थेः परितः सर्वदिक्षु किञ्जल्काः सन्ति एवं भूगोलस्य परितस्तारापञ्जरमित्यर्थः ॥२॥

---

१. श्रीकृदम मू० । २. पद्योत मू० । ३. द्युभूम्यो मू० । ४. विदव्यास मू० । ५. गयाकशाम मू० । ६. रोदस्योरतधराणि मू० । ७. रदुभागे मू० । ८. कुमुदित्कमिदं मू० । ९. लक्षपाणि मू० । १०. विंशशति मू० । ११. कुसुमं यर्था मू० ।

एवमुपन्यस्ते प्रमाणाकारविरोधे प्रमाणविरोधं तावत् परिहरति नृणामिति–

नृणां द्राघिष्ठत्वं कृत[1]युगभवानां कलिभुवां
त्वतिक्षोदिष्ठत्व स्मृतमिति भिदायोजनमितौ ।
नृमानेन ब्राह्मं दिनमिव कृतक्ष्माविपुल[2]तां
मिमीतेऽयं व्यासः कलिनृकरजैर्योजन[3]गणैः ॥३॥

द्राघिष्ठत्वं दीर्घतमत्वम् उच्चप्रमाणमिति[4]तां निशम्येति रवेत्या अत्युच्च-त्वस्मृतं चेदमवेक्ष्यो[5] दिष्टत्वं क्षुद्रतमत्वं,'स दृष्ट्वा क्षुल्लाकान् मर्त्यानिति[6]' भागवते मुचकुन्दः । 'कलिनरान[7]तिक्षुद्रान् ददर्शेति' स्मृतम् कलिनृणां किरजैः हस्तोत्थैः द्वात्रिंशता सहस्रैर्हस्तानां योजनं भवतीत्यर्थः ॥३॥

तुषाराद्रेर्लङ्कावधिभरतवर्षं निगदितं
स्मृतस्तस्य व्यासो नवदशघनी योजनमितः ।
दृशाप्तं पश्यामो नवदलशती योजनमितः
प्रमाणं पौराणं[8] सकलमपि विद्यान्नखगुणम् ॥४॥

नवदशघनी नवसहस्री नवदलशती नवशत्या अर्द्धस्वार्द्धंचतुःशतिः--

[9]तथेन्दुयोजनैर्लङ्का देवकन्यान्तरं स्फुटम् ।
तस्या स्वामी खनागैस्तु विंशत्या सागरस्ततः ॥[10]
मौल्लारः पञ्चदशभिः पर्यल्पष्टाभिरीरिताः ।
वत्सगुल्मं ततो दिग्भिरुज्जयिन्यभ्रपञ्चभिः ।
कुरुक्षेत्रं खरुद्रैस्तु सुमेरुस्तत्त्वपन्नगैः[क] ॥

इत्युक्तम् । तत्राष्टादशाधिका चतुःशतो कुरुक्षेत्रावधिः, ततः परतोऽपि द्वात्रिंशद्योजनानि वा वक्ष्यमा[11]णरीत्या द्विचत्वारिंशद्योजनानि वा हिमशैलोऽस्ति । तेन 'शतार्द्धकोटिविस्तारा भूमिरेषा महामुने[ख]' इति यदुक्तम्--तत्र सार्द्धकोटिद्वयं

---

१. कृतयुग मू० । २. विपुलग्ना मू० । ३. येजन मू० । ४. मतितां मू० । ५. चैचवेक्ष्योदिष्टत्वं मू० । ६. क्षुल्लाकान्मसई मू० । ७. नरातति मू० । ८. पौरापा मू० । ९. तथेन्दु मू० । १० सगरः मू० । ११ माया मू० ।

(क) सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे १७, १८, १९, २० श्लोकेषु विषयोऽयं प्राप्यते ।

(ख) उद्धरणमिदं ग्रन्थकृतां निर्दिष्टपुराणेषु न कुत्राप्यवाप्यते ।

बोध्यम्, "लक्षयोजनविस्तारो जम्बूद्वीपोऽयमीरितः' इत्यत्र[1] पञ्चसहस्रयो[2]जनत्वं ज्ञेयम् । तथा 'नवयोजनसाहस्रं' इत्यत्र सार्द्धचतुः शतीति । अत्र कोटचंघ्रौ-द्विगुणो[3]त्तराणां स्वसमानैः समुद्रैः परिवेष्टितानां सप्तानां द्वी[4]पानां निवेश इति पक्षे भूमि[5]नाभिस्थस्य जम्बूद्वीपस्य व्यासः । ( ४३१ ), पञ्चसहस्रपक्षे तु कोटचंघ्रौ पञ्चत्रिंशत्सहस्राधिकायां तेषां निवेशः, कोटिमानो यो[6]जनभूमौ तावानंशोऽत्र न्यूनो ज्ञेयः[7] । तत् प[8]रितः सपादकोटिस्तम इति भूमिसन्निवेशो बोध्य. । केचित् ४१६७ ए[9]तेषामह्नरवि[10]र्षाद् विरोधो बोध्यः ॥ ४ ॥

कुपद्यमिति—

कुपद्मं वेदास्रं खखसुरः ३३०० ततः सन्धिवलये
वियद् व्योमाराति द्विपशशिभिरस्रान्तपरिधिः १८००० ।
वसुव्योमक्ष्माभृत्तिथिभिः १५७०८ रवनीनेमिरमुतो
बहिर्नेम्यष्टाशा ११०३ [11]खरसयुगपुष्टा ४६० भरतभू ॥५॥

भारताः केतुमाला[12]श्च भद्राश्वाः कुरवस्तथा ।
यत्रापि लोक[13]पद्मस्य मर्या[14]दागिरयो[15]ह्यतः ॥इति॥

वैष्णवादिषु जम्बूद्वीपश्चतुर्दलके माला[16]कार उक्त , तथा भारते च "चतुरस्रं महाराजस्त्रयस्त्रिंशत्तु मण्डलम्' इति । कमलगर्भदलसन्धिवलयस्य परिव्यासस्त्रयस्त्रिंशच्छतयोजन[17]उक्तः । तथा तत्रैव अष्टादशसहस्राणिषट्शतानि च भारतमिति यत्रान्तर्वलयस्य परिधिरप्यु[18]क्तः । तथाउ[19]क्तरीत्या पञ्चसहस्रयोजनायामस्य जम्बूद्वीपस्य परिधिः । पञ्चदशसहस्राणि सप्तशतानि अष्टौ च योजना न भवन्ति । तत्र म[20]ध्यमवलयस्यान्ते चतुर्दिक्षु चत्वारो हिमा[21]चलादयो मर्या[22]दागिरयः । तेभ्यो बहिर्भागे चत्वारि भरतादीनि वर्षाणि, तत्र चापत्रस्यांशतृतीयभागाकारस्य धनुरकारोत्तरभुजस्य[23]पूर्वापरायतस्य भरतवर्षस्य दैर्घ्यमेकं सहस्रं

---

१. इसत्रयं मू० । २. याजनत्वं मू० । ३. द्विगुणोतिराणां मू० । ४. द्विपानां मू० । ५. नाभिस्पृश्य मू० । ६. याकन मू० । ७. सेयं । ८. ता पीरत मू० । ९. रातेष्टाम मू० । १०. प्रर्षाद मू० । ११. स्वरसपुष्टा मू० । १२. मालाश्च मू० । १३. पयस्य मू० । १४. मर्यादग्गिरया मू० । १५. श्रतश्च मू० । १६. अलाकार मू० । १७. योजनउर मू० । १८. रप्युक्तुः मू० । १९. उरीत्या मू० । २०. मदध्यम मू० । २१. हिमोचलादर्या मू० । २२. मर्यागिरय मू० । २३. भुजस्यर्वा मू० ।

नव[1]शतानि सार्द्धत्रिषष्टिश्च योजनानि विस्तारश्च हिमाचलाल्लङ्कावधिषष्ठाधिकानि चत्वारिंशतानि योजनानि भवन्ति। अत्र यदेव यत्र सन्धेर्वहिर्मध्यमवलयादर्वा[2]क् कोणेषु क्षेत्रफलभूस्तदेव मध्यमवलयाद् बहिः। एषु भरतादिषु ज्ञेयम, तेन फलतः पञ्चसहस्रायामेव सिद्धयति ॥ ५ ॥

यथेति—

यथाधस्तद्[3]भूमिः पुटकमुपरिस्थं द्यु[4]पुटकम्
तयोरन्तर्व्योम्नि भ्रमति भग[5]णस्तत्र तपनः।
तुलादौ[6]मेषादौ भ्रमति व[7]लये यत्र विषुवत्
समाख्ये तन्नेमिर्भुजगविशिखव्योमधृतिभिः ॥६॥

ब्रह्माण्डस्थं द्वे पुटके, तत्राधस्तनभूमिरुपरितनद्यौः, तयोर्मध्येऽन्तरिक्षे भ चक्रम्, तत्र ग्रहाणां गतिमण्डलानि षट्, तत्र मेषतुलयोराद्यदिने यदनुपदिनोपरि रविभ्रमति तत्स्थानं विषुवत् संज्ञम्। तेन उपरितनमपि मेषादौ रविभ्रमणस्थानं विषुवदिति लक्षणया गीयते। यथा ब्रह्मवैवर्ते—

श्वेतस्योत्तरः शैलश्शृङ्गवानिति विश्रुतः।
त्रीणि तस्य तु शृङ्गाणि यैरयं शृङ्गवान् स्मृतः ॥
उत्तरकुरूणामुपासन्ते······ ·· ॥

श्वेताचलस्योदीच्यामयमस्तीत्यर्थः।

दक्षिणं चोत्तरं चैव मध्यं वैषुवतं तथा।
शरद्वसन्तयोर्मध्ये तद्भानुः प्रतिपद्यते ॥
मेषादौ च तुलादौ च मैत्रेयो विषुवत्स्थितः।
तदा तुल्यमहोरात्रं करोति तिमिरापहः ॥

तन्नेमिः तस्य विषुवचक्रस्य नेमिः, परिधिः तत्प्रमाणमुक्तं मात्स्ये—'अभ्यन्तरं सपर्येति मण्डलान्युत्तरायणे' इत्युपक्रम्य—

---

१. मव मू० । २. दुर्वाक मू० । ३. यथाधस्मभ्दूमी मू० । ४. एद्युपुटकं मू० । ५. गायास्तं मू० । ६. तुलादो मू० । ७. वलर्यं मू० ।

इत्युपक्रम्य –

प्रमा[१]णं मण्डल[२]स्यापि योजना[३]ग्रान्निबोधत ।
योजनानां सहस्राणि दश चाष्टौ च[क] तत्स्मृतम् ।
अधिकान्यष्ट[४]पञ्चाशद् योजनान्यपि[ख]वा पुनः[ग] ॥६॥ इति ।

सितमिति –

सितं ज्यौतिश्चक्रे मकरवपुराभं भपटलम्
मृगाद्वामावर्त्तं धनुरधि चा[५]ग्रादभिहितम् ।
प्रवर्त्यास्मिन् प्राचो नियतगति विक्षे[६]पवशगान्
ध्रुवः षोढा[७] खेटान्न[८]यति पवनग्राहकसितान्[९] ॥७॥

मात्स्ये ध्रुवे बद्धं ज्यौतिष[१०]मण्डलमर्कादिसप्तपर्यन्तमुक्तम् । तन्मध्ये नक्षत्रमण्डलं द्वादशराश्यात्मकमस्तीति चोक्तम् –

सर्वेषां तु ग्रहाणां वै सूर्योऽधस्तात्प्रसर्पति ।
विस्तीर्णं[११]मण्डलं कृत्वा तस्योर्ध्वं चरते शशिः[१२]॥
नक्षत्रम[१३]ण्डलं चापि सोमादूर्ध्वं प्रसर्पति ।
नक्षत्रेभ्यो बुधस्तूर्ध्वं बुधादूर्ध्वं[१४] तु भार्गवः ॥
वक्रस्तु भार्गवादूर्ध्वं वक्रादूर्ध्वं बृहस्पतिः ।
तस्मात् शनैश्चर[१५]श्चोर्ध्वं देवाचार्योपरिस्थितः[१६]॥
शनैश्चरात्ततश्चोर्ध्वं शेषं सप्तर्षिमण्डलम् ।
सप्तर्षिभ्यो ध्रुवश्चोऽर्ध्वमिति नक्षत्रमण्डलम्[घ]॥ इति ।

शिशुमारापरपर्याय[१७]स्य मकराकारत्वमुक्तं भागवतादौ इति । तत्र ध्रुवेण समसूत्रः शिशुमारस्य नाभिः पुच्छमुपरिमुखं तदधस्तादस्ति, तस्य वाम[१८] भागे मुखा[१९]ग्रादुपरि वामावर्तेन वामनासापुटचक्षुः, कटिकुक्षजघनमेढ्रान्तावधिक्रमेण

१. प्रमाया मू० ; २. मलस्यापि मू० । ३. योजनग्रान्निवोधत मू० । ४. पंचांशो मू० । ५. चाचाग्रान्भिहितमं मू० । ६. विक्षेपशगान मू० । ७. षोटा मू० । ८. भयति मू० । ९. ग्राहसितान मू० । १०. ज्योतिषं उलमर्क मू० । ११. विस्तीर्या मू० । १२. चरते शशानः मू० । १३. नक्षत्रमलंचापि मू० । १४. द्रूधे मू० । १५. तस्माच्छिनैश्चरश्चचोर्ध्वं मू० । १६. परिरिश्वः मू० । १७. पर्दायं मू० । १८. वमाभागे मू० । १९. दरिमुखाग्रादुरि मू० ।

(क) 'तथा' इति पुराणे पाठः । (ख) "योजनानि तु वै" पुराणे पाठः । (ग) मत्स्यपुराणे १२३ अध्याये ६६½, ६७½ श्लोकः । (घ) मत्स्यपुराणे १२७ अध्याये श्लोक सं० ७२, ७३, ७४, ७५ ।

मकरकुम्भमीनमेषवृषभमिथुनाख्या राशयः सन्ति तथा दक्षिणभागे वामावर्तेनैव जघनकुक्षिकर्ण[१] चक्षुर्नासापुटजिह्वान्तावधिक्रमेण कर्कसिंहकन्यातुलावृश्चिक-धनुराख्या षड्राशयः सन्ति। एतेष्वे[२]व सप्तविंशतिनक्षत्राणि यथा विभागं भवन्ति। तत्र एकस्य कक्षायां विषुवत् तत्त्वाभ्यन्तरे[३] नवतिः बहिश्च नवतिरिति राशीति शतं मलानि भवन्ति। तत्र यो ग्र[४]हो येन नक्षत्रेण समसूत्रे मले भ्रमते स तस्मिन्नक्षत्रे दृश्यते। भ्रमणं चेषां ध्रुवाधीनमि[५]त्युक्तं मत्स्यादौ –

अभ्यन्तरं सपर्येति मण्डलान्युत्तरायणे।
बाह्यतो दक्षि[६]णाशायां[क] तपते सूर्यमण्डलम्[ख]॥ इति।
ध्रुवस्य मनसा चैव भ्रमते ज्यौतिषां गणः।
वातानीकमयैः पाशै[ग]र्ध्रुवं वै सः प्रस[७]र्पति॥
तेषा भेदाश्च[८]योगाश्च[ङ] तथा कालस्य निश्चयः।
अ[च]स्तो[९]दयौ तथा ते[१०]षामयने दक्षिणोत्तरे॥
विषुवद्ग्रह[११]वर्णाश्च [छ]सर्गमे[१२]तद् ध्रुवेरितम्।
[ज]वर्षम[१३]ध्ये हिमं रात्रिः सन्ध्ये चैव दिनं तथा॥
शुभाशुभं [झ]फल चैव ध्रुवात्सर्वं [ञ]प्रतिष्ठितम्[१४][ट]। इति।
युगाक्षकोटी [१५]सम्बद्धौ रश्मी[ठ] यौ स्यन्दनस्य तु।
ध्रुवे[१६]ण प्रगृहीतौ तौ रस्मी[ड] यौ नयतो रविम्॥

---

१. जिकान्तावधि मू०। २. एतेषव मू०। ३. विपुवत्सनाभ्यंतरे मू०। ४. ग्रहायं मू०। ५. मित्युत्तुमास्यांदौ मू०। ६. दक्षिणसा मू०। ७. यों प्रातसर्पाति मू०। ८. भेदाश्रयोगश्च मू०। ९. अरतोदयों मू०। १०. तथोत्यता अयम्ने मू०। ११. वगाश्च मू०। १२. स मेतद्ध्रुवरितं मू०। १३. मधो मू०। १४. प्रतिपित्तं मू०। १५. संधीदे मू०। १६. ध्रुवेपा प्रगृहीतौ मू०।

(क) 'दक्षिणेनैव सततं' इति पुराणे पाठः। (ख) मत्स्यपुराणे १२३ अध्याये ६४½ श्लोकः। (ग) 'यो वै' इति पुराणे पाठः। (घ) 'बन्धैर्ध्रुवबद्धः' इति पुराणे पाठः। (ङ) 'भेदश्च योगश्च' इति पुराणे पाठः। (च) 'अस्तोदयास्तथोत्पाता' इति पुराणे पाठः। (छ) 'सर्वं' इति पुराणे पाठः। (ज) 'वर्षं धर्म······ रात्रि' इति पुराणे पाठः। (झ) 'फलञ्चैव' इति पुराणे पाठः। (ञ) 'प्रवर्तते' इति पुराणे पाठः। (ट) मत्स्य पुराणे १२४ अध्याये ७, ८, ९, २८ श्लोकाः। (ठ) 'द्विरश्मिस्यन्दनस्थ तु' इति पुराणे पाठः। (ड) 'रित्ना वाणता रयन्' इति पुराणे पाठः।

आकृष्येते यदा तौ[क] तु ध्रुवेण समधिष्ठितौ[ख] ।
तदा सोऽभ्यन्तरे भानुः[ग] भ्रमते मण्डलानि तु ॥
अशीति मण्डलशत काष्ठयोरुभयोश्चरन् ।
ध्रुवेण मुच्यमानेन [घ]पुरारश्मियुगेन तु[ङ] ॥
तथैव बाह्यतः सूर्यो भ्रमते मण्डलानि तु ।
उद्वेष्ट्यञ्च[१च] वेगेन मण्डलानि तु गच्छति[छ] ॥ इति ॥

प्रतीचिप्रदक्षिणावर्ते भचक्रे प्राचः अप्रदक्षिणागतानृगतयस्तु -

सूर्यस्याङ्कशरा अष्टौ ५९।८[२] विधोर्व्योमाङ्कपर्वताः[३] ७।९० ।
अक्षाग्नयः कुजस्येन्दुगुणाः[४] षट्बाहवस्तथा[५] ३१।२६ ॥
बुधस्येष्वब्धियमलाः दन्ताः २४५।३२ जीव[६]स्य सायकाः ।
गगनं ५० [७]भार्गवस्याथ षडंकाष्टौ ९६[८]।८ शनेर्द्वयम् ॥
अम्बरं २।० विधुन्तुदस्य रसारपाञ्चमस्तथा ६६[९]।५ ।
राहोर्वह्नय ईशाश्च ३।११ गतेर्लिप्तविलिप्तिका ॥इति॥

विक्षेपा अपि—

विक्षेपलि[१०]प्ताः क्षितिजादिकानां
खेशा ११० द्विबाणेन्दुमिता १५२ रसाश्वाः ७६ ।
षट्त्रीन्दवः १३६ खाग्निभुवो १३० विधोस्तु
खमोन्मिता २७० स्ताः कथिता मुनीन्द्रैः ॥इति॥
षोढा ऊर्ध्वं अधः वामतो दक्षिणतः पुरपश्चादिति षट्
प्रकाराः पवनग्रहाः वातज्जवस्ते सितान्वद्धान् ॥७॥

---

१. उद्वष्टयन्वै वेगेन मू० । २. ५१८ मू० । ३. ७१०३५ मू० । ४. कुजस्येंडुगुणः मू० । ५. द्वाहवस्तथा। ३१।३६ मू० । ६. जीस्य मू० । ७. ४० मू० । ८. २६८ मू० । ९. ६४५ मू० ।

(क) 'ते' इति पुराणे पाठः । (ख) 'ते' इति पुराणे पाठः । (ग) 'सूर्यो' इति पुराणे पाठः । (घ) 'पुना' इति पुराणे पाठः । (ङ) 'च' इति पुराणे पाठः । (च) 'यन्वै' इति पुराणे पाठः । (छ) 'मत्स्यपुराणे २४ अध्याये ५५, ५६, ५७, ५८ श्लोकाः ।

ननु विषुवन्मण्डलं यद्युपर्येवावनीमण्डलं कल्प्य[1]मस्ति तर्हि तस्थ: सूर्यः सर्वेषां सर्वदा दृगोचर:[2]स्यादित्याशङ्क्याह—

न चक्रं दूरत्वाच्छिविरमिव भा[3]नां भवदिति
ध्रुवो मध्यस्थोऽपि स्फुरति भकटाहस्य जघने ।
रवि[4]र्याियाच्चापं विदधद[5]मुनैवेह परियन्
समुद्यन्नस्तं यन्निव भरतवर्षे निवसताम् ॥८॥

अमुनैव भकटाहस्य जवेनैव परियन् परिक्रमन् उद्यन् सामीप्यतारतम्यादूर्ध्वमारोहन्निव भाति । अस्तयन् दूरत्वतारतम्या[6]दध अवतरन्निव च भाति, केषां ? भरतवर्षे निवसतामस्[7]माकमित्यर्थः । कटाहजघनेन रवेर्भ्रमणे[8] हेतुः, छायाचापं विदध[9]दिति । सूर्यस्य भुवोभितेर्घटीयंत्रवद् भ्रमणे[10] छायायाश्चापाकारत्वं न स्यात् क्षितिजभेदाभ्युपगमस्ततो विरुद्धत्वं भङ्ग्यन्तरेणास्मत् प्रवेशोऽभिधत्ते । अतश्चापाकारछायात्वान्यथानुपपत्त्या सूर्यस्य भकटाहजघनेनैव भ्रमणं[10] सिद्ध्यति ॥ ८ ॥

अत्रैव दिनमानभेदमुपपादयति –

आरोहावरोहाभ्यां त्रिषु विषुवतो बाह्यवलये
स्थितो[18] न्यूनषट्कवृतिजविपरीतत्वितरग: ।
दवीयानर्कोऽतो पवनपथमेतीह[19] क्रमतो
मृगात्मकाच्चोभावनुदिनमहर्वृद्ध्यपचयौ[20] ॥९॥

विषुवन्मण्डलस्य तुर्यांशादर्वागतो रविर्दृग्गोचरो भवति । प्राच्यां प्रतिच्यामपि तद्देशमतिक्रम्य तिरोधीयत इति । तत्र सममेव न दिवयतु अस्मतो दिनवत्तुर्यांशसूत्रं तद्विषुवते बाह्यवलयं प्रतिनीतं सत् समसूत्रादर्वागतकोणमार्गं मण्डलरेखां स्पृशति अतस्तावत्पर्यन्तं यदा अर्क आयाति तदा अस्माकं दृगोचर इति । एवं ततोऽर्वागेव तिरोधीयते चेति तदा दिनमानं ह्रसति रात्र्यश्च वर्द्धन्ते ।

१. स्तताह ततय: मू० । २. दूरोचर: मू० । ३. मात्य भूवदिति मू० । ४. रवियाचापं मू० । ५. विदुधमुनैत्र मू० । ६. रूतारूतम्याद मू० । ७. निवसतास्मकं मू० । ८. भ्रमाणोहेतु: मू० । ९ योऽभ्रदिति मू० । १०. भ्द्रमयो मू० ।

एवं विषुवतोऽभ्यन्तरेषु मण्डलेषु मेष [१]आरोहावरोहाभ्यां चरन् सूर्यः मध्यरेखातः परतोऽप्युक्तं सूत्रं यत्र वलयं स्पृशति तत्रैव दृग्गोचरो भवति। एवं ततः परं न [२]रविश्च तिरोधीयते इतितदा दिनानि वर्द्धन्ते रात्रयश्च ह्रसन्ति, मृगान्मकरादनुदिनं अह्नो वृद्धिः, कर्कादनुदिनं अह्नोऽपचयः। [३]कर्मभूमावहर्वृद्धिर्भवतीति उह्यं ब्राह्मे-

अष्टादशमुहूर्त्तं [४]यदुत्तरायणपश्चिमम्।
अहर्भवति [५]तच्चापि चरते मन्दविक्रमः[क] ॥ इति ॥

अत्र भचक्रभ्रमणाधीनमेव[६] रवेर्दर्शनादर्शनाख्यावु[७]दयास्तमयौ। अतो वहिर्वलयेषु [८]मार्गविपुलत्वम्। अतः अल्पकालेन सूर्यादर्शनं अन्तर्वलयेषु मार्गाल्पत्वमपि[९] सूर्यादर्शनमित्यत उक्तं "मन्दविक्रमश्चरत" इति ॥९॥

रथाक्षो[१०] मेरुश्च [११]रथचरणमक्षेऽश्वविषुवत्
स्थले धूर्मध्येऽर्को[१२] रथचरणमन्तेऽक्षरसनाम्
ध्रुवः संगृह्णाति[१३]श्लथयति[१४]ततोऽक्षाशनियमात्
चलत्यर्केषादि [१५]विषुवदभिमतो [१६]गतिभिदा ॥१०॥

मेरुं [१७]मानसोत्तरगिरिं च स्पृशत्सूर्यरथस्याक्षोऽस्ति। तत्र विषुवत्प्रदेशेऽश्व-[१८]योजनस्थानम्, मानसोत्तरप्रदेशे चक्रस्थानम्, मध्येऽर्कमण्डलनीडम्। यदाक्षनि-[१९]वद्धां [२०]रसनां ध्रुवः संगृह्णाति, यदा च श्लथां करोति तदा अक्षे विषुवत् स्थान-स्यार्वाक् परतश्चाक्षांशनियमेन सूर्यस्य ईष चक्रादिकं आगच्छत्यपसर्पति च। तच्च-लनमह्नां प्रमाणो[२१] भेदाय भवति, न केवलं कालभेदाद्येन वृद्धिह्रासौ भवतोऽपितु देशभेदादपीत्युभयोपादानं श्लोकद्वयेन ॥१०॥

---

१. आरोहारोहाभ्यां मू०। २. रावच मू०। ३. वृद्धवतिरुक्ते वोह्य मू०। ४. यदुतराण मू०। ५. तचपि मू०। ६. धीनीवेवरकेर्दशना मू०। ७. वुदुया मू०। ८. मार्गवपु मू०। ९. त्वपि मू०। १०. रर्थोक्षोमे मू०। ११. चरसमगरक्षे मू०। १२. संगृह्णति मू०। १३. क्षांशा नियमात् मू०। १४. विषुवदभिभितो मू०। १५. न्दमितभिदा मू०। १६. मासनोत्तर मू०। १७. स्थानः मू०। १८. निवद्धं मू०। १९ रायनाम मू०। २०. प्रमायो मू०।

(क) विष्णुपुराणे २।८।३९ श्लोकः

प्रकृत्तानुपयुक्तमपि [१]निरक्षदेशनित्यं द्युनिशोः साम्यमुपपादयति नदीगत्येति—

नदीगत्या भूमिः कमठसदृशात्यन्तिकगलम्
पराग्भूमध्यांशोर्नरविमयते प्रेत्य[२] जनता
ततोऽर्वाक् दूरोऽपि व्यवधि [३]विरहा [४]दृष्टिपथगे
ततो[५] लङ्कास्थानं[६] स मिह सदा रात्रिदिवसम् ॥ ११॥

कमठसदृशीत्यत्र युक्तिः नदीगत्येति अन्यथा [७]विन्ध्यमूर्धन्येकक्रोशान्तयोः एकस्या प्राचिं प्रति [८]अपरस्याः प्रतीचिं प्रति च गमनं नोपपद्यते "दक्षिणोत्तरतो निम्ना मध्ये तुङ्गा यथा क्षितिः" इति मार्कण्डेयोक्तिरप्यनुसंधेया [९]।

उदीच्या[१०] उच्चत्वमपि "नर्तानद्यागमादेवी" तेन [११]यथोत्तरदेशस्योच्चत्वात्[१२] सूर्यस्य च तेषामस्मदपेक्षया दूरत्वान्मध्यरेखातः [१३]परत्र विषुवतोऽर्वाक्स्थमपि सूर्यं [१४]लङ्कास्थानमवेक्षन्ते, यतश्च "समैव भूरिष्टदेशे[१५] व्यवधायिका[१६] निम्ना तु"। अतो विषुवतो [१७]वाह्यवलयस्य [१८]दूरागमासूर्यं लङ्कास्था व्यवधानाभावान्मध्यरेखागतं पश्यन्तीति [१९]तेषां दिननिशं नित्यं समं अयते [२०]पश्यति, ततः [२१]भूमध्यांशः (पश्यति) ॥ ११ ॥

जनानोनेदीयानिव भवति नेदीय [२२]सितगे
यथा रास्स्थेप्याराादिव[२३] नगशिरःसम्मितरविः[२४]
[२५]थैव चक्रस्थं [२६]प्रथमचरमद्वीपजनता
रविं पश्येनाब्देत्यवनिवृ[२७]त्तिरक्षांशरहिता ॥१२॥

---

१. मिरक्ष मू० । २. प्रोत्य मू० । ३. विरहारहा मू० । ४. दृष्टिपथमे मू० । ५. त्वतो मू० । ६. स्थानां मू० । ७. क्रोत्पन्नयो मू० । ८. पारस्याः मू० । ९. संधोयो मू० । १०. उचीच्या मू० । ११. यथात्तर मू० । १२. दशस्याचत्वात मू० । १३. पस्त्र मू० । १४. स्थानोवेक्षन्ते मू० । १५. समौव मू० । १६. व्यवधीयिका मू० । १७. वलयस्थ मू० । १८. दूरागमाय मू० । १९ तेषों मू० । २०. श्यति मू० । २१. भूमध्यंशो: मू० । २२. सिनगे मू० । २३. प्यारदित्र मू० । २४. रात्रि: मू० । २५. तथेषां मू० । २६. प्रभम मू० । २७. वृत्ति मू० ।

यथा [१]स्वदेशस्थ एव रविः पर्वतस्य वृक्षस्य वा [२]शिरसि [३]सम्मितश्चेत्सान्निध्यात्सन्निहित इव [४]सिद्धिप्रकर्षाद्विप्रकृष्ट इव च भाति एवं [५]जम्बूद्वीपस्थानां निसमीषा[६]स्थानसम्मितः सूर्यः ईषा[७]ज्यसन्निकर्षतारतम्यात्सा[८]मीप्यतारतम्यं न भाति। तथा चर[९]मद्वीपस्थानां चक्रस्थानां सम्मितो [१०]भातीत्युभयेषामेव दिनमान भेदो भवति। मध्यमद्वीपस्थानां तु नित्यमनावृतस्वस्थानस्था एव भातीति। अनिर्वृतिर्जम्बूद्वीपस्थपरिधिदेशः दिनमानभेदकै[११]रक्षांशैर्विवर्जितोऽतो[१२] नात्रास्माकमिव [१३]दिनमानभेदः कदाचिदप्यस्ति ॥ १२ ॥

अथोपरागद्वयं वर्णयति सुषुम्न[१४] इति—

सुषुम्नः सूर्यांशुः[१५] प्रथयति [१६]विधुं वेदवचनात्
[१७]तमस्तद्वारमेत्य ग्रसति तमिहान्येन [१८]वपुषा
[१९]कुहेस्थेन्दूत्क्रान्त रविविषयमाविध्य च विधु-
न्तुदश्चन्द्रो गच्छन् [२०]ग्रहणगतिमेवं वितनुते ॥१३॥

"सुषुम्नः सूर्यरश्मिश्चन्द्रमागन्धर्वः" इति श्रुतौ सुषुम्नाख्यो न सूर्यरश्मिः, नापरि[२१]प्सिमाणत्वात् चन्द्रमसि सुषुम्नशब्दः, न तु स एव चन्द्रमाः "सुषुम्नः सूर्यरश्मिर्यः क्षीणं शशिनमेधते" इति मात्स्ये, सूर्यरश्मिः [२२]"सुषुम्नायस्तर्पितस्तेन चन्द्रमा"[क] इत्युपक्रम्य।

क्षीणं पीतं सुरैः सोमं [२३]आप्याययदिति दीप्तिमान्।
[२४]मैत्रेयैवकल[२५]सन्तं [२६]रश्मिनैकेन भास्करः॥

इति [२७]ब्रह्मवैवर्ते च दर्शनात्। ततश्च तमो राहुः सूर्यमण्डलादधस्थः संस्त-

---

१. स्वदेश्यस्थ मू०। २. शिरस मू०। ३. सिंमित मू०। ४. तिद्विप्रकर्षात् मू०। ५. द्विपस्थीनां मू०। ६. निसमीपास्थनसंमितः मू०। ७. ईषाज्यंन्निकर्षात् मू०। ८. समीप्य मू०। ९. द्वीत्र मू०। १०. भातित्यभं येषामेत्र मू०। ११. भेदोकेरक्षाशैविवर्जितो मू०। १२. तोनतार मू०। १३. दिनमन मू०। १४. सुषुम्न मू०। १५. सूर्यश्रु मू०। १६. यिधुं मू०। १७. तद्वोरेत्य मू०। १८. वुषा मू०। १९. कुषाहेछिंद्र मू०। २०. ग्रहणगमेवं मू०। २१. नागरिप्समाणत्वात् मू०। २२. सुषुम्नो मू०। २३. आप्यायतिदी मू०। २४. मौत्रेयैक मू०। २५. लं संन्त मू०। २६. राश्मि मू०। २७. वैह्य- चदर्शनत् मू०।

(क) वि० पु २।११।२२

द्वारा [1]सुषुम्नान्तं चन्द्रमेत्य [2]अधोगम्य दृष्ट्वेत्यर्थः। इह पौर्णमासे पर्वणि न तु कालान्तरे अन्येन वपुषा केतुरूपेण चन्द्रं ग्रसति। अयं भावः—एकस्य चक्षुषो यथा अधिष्ठानभूतं गोलकद्वयं एवं स्वर्भानोः राहुरूपं केतुरूपं चाधिष्ठानद्वयम्, तच्च नित्यं [3]राशिमण्डले समसूत्रे चरति। अतोऽन्यतरेण सुषुम्नद्वारा दृष्टमिन्दुमितरो ग्रसति। अतोऽपर्वणि न चन्द्रग्रहणं भवति। तथा कुहूषु अमावास्यासु [4]सूर्यस्योपरिष्टत आगच्छता इन्दुना आक्रान्तो यावान् [5]रवेर्विषयः सूर्यमण्डलप्रदेशः तं सूर्यभागमाविध्य तमसा आच्छाद्य सूर्यमण्डलस्योपरिस्थं चन्द्रं स्वर्भानुरासुरः सूर्यं तमसाविध्यत्—"यत्वा सूर्य स्वर्भानुस्तमसा विध्येदासुरः[क]" इत्यादिः। तदिदमुक्तं [6]मात्स्यब्रह्मवैवर्तयोः—

आदित्यान्निर्गतो राहुः सोमं गच्छति पर्वसु।
आदित्यमेति सो[7]माच्च पुनः सौरेषु पर्वसु। इति।

[8]आदित्यात् आदित्यं प्राप्य सुषुम्नद्वारा निर्गतः [9]सन् सोमं पौर्णमास्यायां गच्छति। एवं सोमात्सोमं [10]आदित्यस्थं [11]सत्वं आदित्यमेव [12]गच्छतीति श्लोकार्थग्रहणयुगमेवं वितनुते इति स्पष्टार्थः॥ १३॥

सूर्यादुपरि [13]चन्द्रोऽस्तीत्युक्तम्, अत्र च सूर्योपराग प्रसङ्गे तद्दर्शितम्। अतस्तद्दर्शयन् चन्द्रस्य ह्रासवृद्धिरप्युपपादयति—

शशीशृङ्गोनतार[14]दुपरि [15]तपनादुन्मुखकरै-
रधस्थः सन् यस्याज्जलमयमिमं स प्रथयति
सुपूर्णो सांमुख्ये सकलमपि राकारि च [16]तथा
तदल्पत्वाचान्द्रं[17] लघुतमतया[18] पक्षयुगले[19]॥ १४॥

जलमयं चन्द्रमसं[20] सूर्यरश्मिभिर्यावति देशे दृष्यते तावत्प्रकाशते इत्युभयवादिसिद्धान्तः। [21]तत्र [22]शुक्लद्वितीयाचन्द्रः सूर्यादुपर्येवास्तीति तस्योपरि-

---

१. सुषुम्नद्वान्त मू०। २. आधागम्य मू०। ३. मण्डछो मू०। ४. उरिष्टष्टत मू०। ५. रेवेर्विषयः मू०। ६. मात्स्यवेह्मवयोः मू०। ७. सामांच्च मू०। ८. अदित्यात् मू०। ९. सह् मू०। १०. अदित्यस्थं मू०। ११. सात्वं मू०। १२. मेवं मू०। १३. अस्तीसुपीक्तं मू०। १४. दुपारि मू०। १५. करौ मू०। १६. चतरथा मू०। १७. चान्दनम् मू०। १८. लरतमतया मू०। १९. युगुले मू०। २०. चन्द्रमलं मू० २१. त्र मू०। २२. क्षुह्म मू०।

(क) ऋग्वेदः ५।४०।५

शृङ्गत्वं[1] घटते, अन्यथा कार्यधस्थत्वे अधः शृङ्गमेव भासते। एवं कृष्णत्रयोदशी चन्द्रोऽपि पुरोभागे ऊर्ध्वशृङ्ग एव दृश्यते, तेन तपनादधः शशीति सिद्धम्। एवं च यदा चन्द्रस्य सम्पूर्णसूर्याभिमुखत्वं तदा [2]पूर्णमास्यां पूर्णचन्द्रः प्रथते। यदा तु आभिमुख्योऽल्पं तदा सूर्यकरानाक्रान्तश्चन्द्रभागो न [3]दृश्यते [4]इत्ययनमण्डलं प्रथते इति वृद्धिह्रासतारतम्या[5]वाभिमुख्यवैमुख्ययोर्वह्वल्पत्वे [6]उन्नेये ॥ १५ ॥

अत्र ज्योतिर्विदां मतमुपन्यस्यति विवक्षेति --

**विवक्षा [7]भेदाऽधो धरणिपटलं कन्दुकयते**
**स दैवज्ञ[8]स्तारापट[9]लमपि [10]तत्पञ्जरयते**
**तदा [11]भूर्व्यासो भजति परिधित्व विषुवता**
**परिवेषाश्च स्युः प्रलिखगतिपथं[12] भिन्नमितिना ॥ ५ ॥**

यथा वेदान्तिनो व्यवहारतः सृष्टिदृष्टौ प्रसिद्धयामपि अद्वैततत्वप्रतिपत्तिप्रत्यास[13]न्नतया तां[14] व्यवहारविरुद्धामपि[15] दृष्टिसृष्टिमभ्युपगच्छन्ति एवं भुवनकोशविदोऽपि [16]व्यवहारतः पौराणं मतमनुसरन्तोऽपि [17]दृगाक्षिप्रश्नप्रत्यासन्नां व्यवहारविरुद्धामपि गोलप्रक्रियां उत्प्रेक्षते। न चैव [18]तावता वस्तुतत्वमन्यथा [19]भवति। [20]तथाहि भगवश्छातपान्तरिक्षे [21]द्रष्टव्यस्य भूकन्दुकस्य पृष्टे लङ्का, अधस्तात्समसूत्रे सिद्धपुरम्, लङ्कायाः पूर्वतो यमकोटिः, पश्चिमतो रोमकपत्तनम्, दक्षिणतो वडवा[22]नलः, उदीच्यां मेरुः, [23]गोलस्योत्तरपश्चिमे जम्बूद्वीपः दक्षिणे सप्तसमुद्राः, षट्द्वीपाश्चेत्य[24]भ्युपगच्छन्ति। एतत्सर्वं [25]दृष्टविरुद्धं रचना[26] विरुद्धं च। नहि गोलताया वास्तवत्वे सर्वदेशीयानां [27]खभूम्योरौर्ध्वाधर्यप्रत्यये वाधितः सम्भवति, नापि गोलस्य समुद्राधारत्वं घटते, नापि मेरुतो नदीनां भारतवर्षं प्रत्यागमनं च युज्यते। एतच्च सर्वं ज्योतिर्विदोऽभ्युपगम्यः। व्यवहारतो द[28]र्पणोदरतुल्यतामवनेरापादयतोऽपि [29]दृष्टव्यवहारेण[30] यस्य लाघवेन [31]सिद्धयति तस्याः कन्दुका-

---

१. शृगत्वै मू०। २. पूणमास्यां मू०। ३. नदृश्यः त मू०। ४. इत्यनं मू०। ५. तारलम्या मू०। ६. उन्नेये मू०। ७. भेदाघो मू०। ८. सदौवज्ञ मू०। ९. पटाल मू०। १०. पञ्जरयन्ते मू०। ११. भूमेव्योसा मू०। १२. गपथं मू०। १३. प्रत्यासन्नत्या मू०। १४. ल मू०। १५. विरुद्धमपि मू०। १६. वहारतः मू०। १७. दृगासि मू०। १८. ताताव मू०। १९. भवाति मू०। २०. थाहि मू०। २१. वष्टव्यस्य मू०। २२. ववनलः मू०। २३. पाश्चा मू०। २४. श्चेतिभ्युप मू०। २५. विरुद्ध नू०। २६. रचवन मू.। २७. रव्य मू०। २८. दर्यणोदर मू०। २९. प्रष्ट। ३०. व्यवहारणि। ३१. सिध्यथतिस्याः।

कारत्वं विवक्षन्ति। तमेव विवक्षाभेदमाश्रित्य यो धरणिपटलं कन्दुकयते कन्दुकमिवाचष्टे स एव दैवज्ञः कन्दुकपरिभाषानुरोधा[1]त्तारापटलमपि तत्पञ्जरायते। तस्य भूगोलस्य पञ्जरमिवाचष्टे। यथा विकसितस्य पद्मस्य यो व्यासः स एव तस्य मुकुलितस्य परिधिर्भवति। अतो दैवज्ञा भूमेः परिधिं पञ्चसहस्रयोजनमेवाहुः,[2] तेन व्यासे परिधित्वं परिधिप्र[3]चार इति भावः। यथा च सूर्यस्य [4]परिवेषो भवति एवं विषुवच्चक्रेण भूगोलस्य कङ्कणाकारः परिवेषो भवति। तेन [5]विषुवतां प्रतिखगपथं भिन्नमिति--

नग [6]नगाक्षि नवाष्टमितारवेः

रसरसेषु महीषु मिता विधोः[7]

[8]निगदितावनिमध्यत उच्छ्रितिः

श्रुतिरिव किल योजनसंख्यया ॥

इति उक्तसंख्याद्विगुणेन चन्द्रकक्षाभुवं परिवेषयति। एवं सूर्या[9]दिकक्षाणामप्युपर्युपरि व्यासवृद्धिः। तत्तत् कक्षायां विषुवच्चक्रमानमपि[10] उत्तरमुत्तरं[11] वर्द्धते। तत्र विषुवतो दक्षिणतो[12] वा मतश्च गतिमण्डलान्यन्यानि [13]सन्तीति भचक्रस्य कुलालचक्रवद् भ्रमणे[14] रथचक्रवद् भ्रमणे च समानमिति न दिनवृद्ध्यादौ पृथगुपपत्तिरस्माभिर्वाच्या ॥ १५ ॥

भुवः [15]कन्दुकाकारतायारपारमार्थिकत्वे न केवलं दृष्टविरोधः, अपितु सिषाधयिषितग्रहणदिनमानादिदृष्टप्रयोजनहानिरपीत्याह—[16]

द्राघ्मां यदीति यदि ब्रूषे [17]सूर्यभ्रमितपिधानशशभृता

तदा तत्स्या[18] त्संध्यामनुविविधराश्योरपि तयोः

वदन्नूर्णावृत्तानिहखगपथान[19]न्तरवती

[20]शशाङ्केन्दोर्वेधं [21]कथमनुभवेदिदृशि वद ॥ १६ ॥

---

१. परिभाषानुराधात्। २. मैवाहुः मू०। ३. परिधिपचार मू०। ४. परिवेवषो मू०। ५. पुत्रता मू०। ६. नतन्ननगौदि मू०। ७. विधाः मू। ८. तिगदिता मू०। ९. एवेसर्योदिकक्षाणां मू०। १०. चक्रमानमानमपि मू०। ११. उत्तरमुरं मू०। १२. दक्षणतो मू०। १३. सतीति मू०। १४. भ्रमाणे मू०। १५. कन्दुकारता मू०। १६. रपीत्यहा मू०। १७. सूर्यग्रमितविधानक्षाभृता मू०। १८. तत्स्यत्संध्या मू०। १९. नेतरवती मू०। २०. दशांकेन्द्वोवेधं मू०। २१. दिद्वशियदं मू०।

यदि [1]सूर्यादधस्थेन चन्द्रेण[2] सूर्यमण्डलस्य पिधानं यत्तदेव सूर्यग्रहणं चेत्तर्हि विभिन्नराशिस्थितयोश्चन्द्रसूर्ययोः सतोः सन्ध्यामनुसन्ध्यकाल समीपे अस्मद्-दृष्ट्या चन्द्रेण सूर्यस्य पिधानं न कर्तुं शक्यते । [4]अत्राप्युक्तिमाह वदन्निति—भूगोलं वेष्ट[5]यति [6]चन्द्रकक्षामति महती तामपि [7]वेष्टयति सूर्यकक्षा, [8]ततस्त्रयोदशगुणत्र्यं-शाधिकातीव महती ते उभे अपि द्वादशधा विभक्ते चेत् खमध्यस्थश्चन्द्रः खमध्यस्थ-मेव सूर्यं पिदध्यात् [9]तदानीं सूर्यचन्द्रदृशामेकसूत्रपातसम्भवात् उपसन्ध्यं तु तयोरेक-सूत्रपतितयोरपि अस्मद्[10]दृशाऽसम्भवे[11]अदो[12]षाभावात् न युज्यते तदिति भावः । यतो भवान् उर्णावृतान् उर्णाजालस्येव [13]वृतान् [14]येषां तान् उत्तरोत्तर[15]वृद्धान् अन्तरवतः वह्वन्तरयुतान्[16]खेटकक्षामार्गान् वदति अतो[17]हेतोरुपसन्ध्यं चन्द्रार्कदृष्ट-मेकसत्रपातो न सम्भवतीत्यक्षरार्थः । ईदृशि पदे ईदृशे विषये दृशा अर्केन्दोर्वेधं[18] कथमनुभवेत् [19]गोलवादी, न कथमपि इत्यर्थः । अनुभूयमानस्य तस्य समर्थनेन तव काचिद्युक्तिरस्तीति भावः ।। १६ ।

एवं परमते सूर्यग्रहणासम्भवमुपपाद्य[20] दिनमानभेदासम्भवमप्युपपादयति—

अतीवार्वाचीने खलु शशभृदस्तोदयपदे
ततोऽधोऽधो देशान्नयनकिरणास्तत्समगुणान्[21]
समाक्रान्तुं शक्त इति विपुलकक्षोदिविचरः
[22]स्ववृत्तार्द्धाधस्थोऽप्यनुसरतु चक्षुर्विषयताम् ।। १७ ।।

तुलादौ भूमध्यरेखया समसूत्रे देशे यत्र चन्द्रो दृष्टस्तदनुविध्योपरि प्रदेशस्था-नामस्माकं दृष्टिमध्यसूत्रादधस्थमपिविषयं व्याप्नोति तदा[23]मध्यकक्षास्थो रविस्तु[24]-लादिविवरे मध्यरेखातोऽधस्थोऽस्मद्दृष्टिगोचरो भवेत्,[25]ततश्च तस्मिन्नवसरे समत्वं रात्रिदिवसयोर्न स्यात्, न [26]चास्य दोषस्य [27]निवारणे गोलवादिनः काचिद्युक्ति-रस्ति । तस्मात्पौराणमेव[28] मतं वस्तुतत्वविषयम् । गोलवादस्तु [29]गणितलाघवार्थं दृष्टिसृष्टिवदेव [30]विवक्षामात्रमिति विद्वांस एव विदां कुर्वन्तु ।: १७ ।।

१. सूर्यायोः दधः मू० । २. चन्द्रंण मू० । ३. आपितेयोः मू० । ४. अत्रप्युक्तिमाह मू० ५. वष्टेयती मू० । ६. कक्षाति मू० । ७. वेष्टयाती मू० । ८. तातस्त्रयोदश मू० । ९. दानी मू० । १०. अस्मदृशा मू० । ११. संभवे मू० । १२. घोसभावात् मू० । १३. वृतानि मू० । १४. यषां मू० । १५. वृद्धन मू० । १६. खोट मू । १७. हेता मू० । १८. अर्केद्धोवेधं मू० । १९. होलवादी मू० । २०. उपापाद्य मू० । २१. गुणान मू० । २२. वृत्तार्द्धधस्थ मू० । २३. मह्रकक्षास्थो मू० । २४. तुलादविवरे मू० । २५. तातश्च मू० । २६. न चास्या-दोषांस्थं मू० । २७. निवत्रारणे मू० । २८. तस्मत्येरायोमेव मू० । २९. गणीत मू० । ३०. विक्षामात्रामिति मू० ।

इति संक्षिप्य पौराणसौरसिद्धान्तमार्गयोः ।
भूगोलविषये साम्य वर्णितं[1] बुधतुष्टये ॥ १८ ॥

इति श्रीमत्पदवाक्यप्रमाणमार्यादाधुरन्धरचतुर्धरवंशावतंसगोविन्दसूरिसूनो नीलकण्ठस्य कृतौ [2]सौरपौराणिकमतसमर्थने रोदस्यो प्रकरणं समाप्तम् ।

॥ श्रीरामाय नमः ॥ संवत् १८४४ ।

॥ समाप्तश्चायं ग्रन्थः ॥

Acc. No. 98450
Date

१. वर्णिलं मू० । २. मत्य मू० ।